॥ श्रीबटुकभैरवसहस्रनामस्तोत्रम् २ ॥

.. Shri Batukabhairava SahasranAma Stotram 2 ..

sanskritdocuments.org

August 20, 2017

.. Shri Batukabhairava SahasranAma Stotram 2 ..

॥ श्रीबटुकभैरवसहस्रनामस्तोत्रम् २ ॥

Sanskrit Document Information

Text title : baTukabhairavasahasranAmastotram 2

File name : baTukabhairavasahasranAmastotram.itx

Category : sahasranAma, shiva

Location : doc_shiva

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : DPD, NA

Description-comments : Edited by S. V. Radhakrishna Shastriji

Source : Rudrayamalatantra

Acknowledge-Permission: Mahaperiaval Trust

Latest update : November 7, 2014, August 18, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

August 20, 2017

sanskritdocuments.org

॥ श्रीबटुकभैरवसहस्रनामस्तोत्रम् २ ॥

विनियोगः -
ॐ अस्य श्रीबटुकभैरवसहस्रनामात्मक स्तोत्रस्य श्रीदुर्वासा ऋषिः ।
अनुष्टुप्छन्दः । श्रीबटुकभैरवो देवता ।
मम सर्वकार्यसिद्ध्यर्थं सर्वशत्रुनिवारणार्थं
श्रीबटुकभैरवसहस्रनामस्तवपाठे विनियोगः ।

ऋष्यादिन्यासः -
श्रीदुर्वासा ऋषये नमः शिरसि ।
अनुष्टुप् छन्दसे नमः मुखे । श्रीबटुकभैरवो देवतायै नमः हृदि ।
मम सर्वकार्यसिद्ध्यर्थं सर्वशत्रुनिवारणार्थं
श्रीबटुकभैरवसहस्रनामस्तवपाठे विनियोगाय नमः सर्वाङ्गे ।

नमो भैरवरूपाय भैरवाय नमो नमः ।
नमो भद्रस्वरूपाय जयदाय नमो नमः ॥ १॥

नमः कल्पस्वरूपाय विकल्पाय नमो नमः ।
नमः शुद्धस्वरूपाय सुप्रकाशाय ते नमः ॥ २॥

नमः कङ्कालरूपाय कालरूप नमोऽस्तुते ।
नमस्त्र्यम्बकरूपाय महाकालाय ते नमो नमः ॥ ३॥

नमः संसारसाराय सारदाय नमो नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥ ४॥

नमः क्षेत्रनिवासाय क्षेत्रपालाय ते नमः ।
क्षेत्राक्षेत्रस्वरूपाय क्षेत्रकर्त्रे नमो नमः ॥ ५॥

नमो नागविनाशाय भैरवाय नमः ।
नमो मातङ्गरूपाय भाररूप नमोऽस्तु ते ॥ ६॥

नमः सिद्धस्वरूपाय सिद्धिदाय नमो नमः ।
नमः बिन्दुस्वरूपाय बिन्दुसिन्धुप्रकाशिने ॥ ७॥

नमः मङ्गलरूपाय मङ्गलाय नमो नमः ।
नमः सङ्कटनाशाय शङ्कराय नमो नमः ॥ ८॥

नमो धर्मस्वरूपाय धर्मदाय नमो नमः ।
नमोऽनन्तस्वरूपाय एकरूप नमोऽस्तु ते ॥ ९॥

नमो वृद्धिस्वरूपाय वृद्धिकामिन्नमोऽस्तुते ।
नमो मोहनरूपाय मोक्षरूपाय ते नमः ॥ १०॥

नमो जलदरूपाय सामरूप नमोऽस्तु ते ।
नमः स्थूलस्वरूपाय शुद्धरूपाय ते नमः ॥ ११॥

नमो नीलस्वरूपाय रङ्गरूपाय ते नमः ।
नमो मण्डलरूपाय मण्डलाय नमो नमः ॥ १२॥

नमो रुद्रस्वरूपाय रुद्रनाथाय ते नमः ।
नमो ब्रह्मस्वरूपाय ब्रह्मवक्त्रे नमो नमः ॥ १३॥

नमस्त्रिशूलधाराय धाराधारिन्नमोऽस्तुते ।
नमः संसारबीजाय विरूपाय नमो नमः ॥ १४॥ var वीररूपाय

नमो विमलरूपाय भैरवाय नमो नमः ।
नमो जङ्गमरूपाय जलजाय नमो नमः ॥ १५॥

नमः कालस्वरूपाय कालरुद्राय ते नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥ १६॥

नमः शत्रुविनाशाय भीषणाय नमो नमः ।
नमः शान्ताय दान्ताय भ्रमरूपिन्नमोऽस्तु ते ॥ १७॥

नमो न्यायगम्याय योगिध्येयाय ते नमः । var न्यायगम्याय शुधाय
नमः कमलकान्ताय कालवृद्धाय ते नमः ॥ १८॥ var कामवृद्धाय
नमो ज्योतिःस्वरूपाय सुप्रकाशाय ते नमः ।
नमः कल्पस्वरूपाय भैरवाय नमो नमः ॥ १९॥

नमो जयस्वरूपाय जगज्जाड्यनिवारणे ।
महाभूताय भूताय भूतानां पतये नमः ॥ २०॥

नमो नन्दाय वृन्दाय वादिने ब्रह्मवादिने ।
नमो वादस्वरूपाय न्यायगम्याय ते नमः ॥ २१॥

नमो भवस्वरूपाय मायानिर्माणरूपिणे ।

विश्ववन्द्याय वन्द्याय नमो विश्वम्भराय ते ॥ २२॥

नमो नेत्रस्वरूपाय नेत्ररूपिन्नमोऽस्तु ते ।
नमो वरुणरूपाय भैरवाय नमो नमः ॥ २३॥

नमो यमस्वरूपाय वृद्धरूपाय ते नमः ।
नमः कुबेररूपाय कालनाथाय ते नमः ॥ २४॥

नमः ईशानरूपाय अग्निरूपाय ते नमः ।
नमः वायुस्वरूपाय विश्वरूपाय ते नमः ॥ २५॥

नमः प्राणस्वरूपाय प्राणाधिपतये नमः ।
नमः संहाररूपाय पालकाय नमो नमः ॥ २६॥

नमश्चन्द्रस्वरूपाय चण्डरूपाय ते नमः ।
नमो मन्दरवासाय वासिने सर्वयोगिनाम् ॥ २७॥ var मन्दार

योगिगम्याय योग्याय योगिनां पतये नमः ।
नमो जङ्गमवासाय वामदेवाय ते नमः ॥ २८॥

नमः शत्रुविनाशाय नीलकण्ठाय ते नमः ।
नमो भक्तिविनोदाय दुर्भगाय नमो नमः ॥ २९॥

नमो मान्यस्वरूपाय मानदाय नमो नमः ।
नमो भूतिविभूषाय भूषिताय नमो नमः ॥ ३०॥

नमो रजःस्वरूपाय सात्त्विकाय नमो नमः ।
नमस्तामसरूपाय तारणाय नमो नमः ॥ ३१॥

नमो गङ्गाविनोदाय जयसन्धारिणे नमः । var जटासन्धारिणे
नमो भैरवरूपाय भयदाय नमो नमः ॥ ३२॥

नमः सङ्ग्रामरूपाय सङ्ग्रामजयदायिने ।
सङ्ग्रामसाररूपाय पावनाय नमो नमः ॥ ३३॥ var यौवनाय
नमो वृद्धिस्वरूपाय वृद्धिदाय नमो नमः ।
नमस्त्रिशूलहस्ताय शूलसंहारिणे नमः ॥ ३४॥

नमो द्वन्द्वस्वरूपाय रूपदाय नमो नमः ।
नमः शत्रुविनाशाय शत्रुबुद्धिविनाशने ॥ ३५॥

महाकालाय कालाय कालनाथाय ते नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥ ३६॥

नमः शम्भुस्वरूपाय शम्भुरूपिन्नमोऽस्तुते ।
नमः कमलहस्ताय डमरूहस्ताय ते नमः ॥ ३७॥

नमः कुक्कुरवाहाय वहनाय नमो नमः ।
नमो विमलनेत्राय त्रिनेत्राय नमो नमः ॥ ३८॥

नमः संसाररूपाय सारमेयाय वाहिने ।
संसारज्ञानरूपाय ज्ञाननाथाय ते नमः ॥ ३९॥

नमो मङ्गलरूपाय मङ्गलाय नमो नमः । repeated from 8
नमो न्यायविशालाय मन्त्ररूपाय ते नमः ॥ ४०॥

नमो यन्त्रस्वरूपाय यन्त्रधारिन्नमोऽस्तु ते ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥ ४१॥

नमः कङ्कालरूपाय कलङ्काय नमो नमः । var कलङ्करूपाय
नमः संसारपाराय भैरवाय नमो नमः ॥ ४२॥

रुण्डमालाविभूषाय भीषणाय नमो नमः ।
नमो दुखःनिवाराय विहाराय नमो नमः ॥ ४३॥

नमो दण्डस्वरूपाय क्षणरूपाय नमो नमः ।
नमो मुहूर्तरूपाय सर्वरूपाय ते नमः ॥ ४४॥

नमो मोदस्वरूपाय श्रोतरूपाय नमो नमः । var श्रोणरूपाय
नमो नक्षत्ररूपाय क्षेत्ररूपाय ते नमः ॥ ४५॥

नमो विष्णुस्वरूपाय बिन्दुरूपाय ते नमः ।
नमो ब्रह्मस्वरूपाय ब्रह्मचारिन्नमोऽस्तु ते ॥ ४६॥

नमः कन्थानिवासाय पटवासाय ते नमः ।
नमः ज्वालनरूपाय ज्वलनाय नमो नमः ॥ ४७॥

नमो बटुकरूपाय धूर्तरूपाय ते नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥ ४८॥

नमो वैद्यस्वरूपाय वैद्यरूपिन्नमोऽस्तु ते ।

नमः औषधरूपाय औषयाय नमो नमः ॥ ४९॥

नमो व्याधिनिवाराय ध्याधिरूपिन्नमो नमः ।
नमो ज्वरनिवाराय ज्वररूपाय ते नमः ॥ ५०॥

नमो रुद्रस्वरूपाय रुद्राणां पतये नमः ।
विरुपाक्षाय देवाय भैरवाय नमो नमः ॥ ५१॥

नमो ग्रहस्वरूपाय ग्रहाणां पतये नमः ।
नमः पवित्रधाराय परशुधाराय ते नमः ॥ ५२॥

यज्ञोपवीति देवाय देवदेव नमोऽस्तु ते । var यज्ञोपवीत
नमो यज्ञस्वरूपाय यज्ञानां फलदायिने ॥ ५३॥

नमो रुद्रप्रतापाय तापनाय नमो नमः । var रणप्रतापाय
नमो गणेशरूपाय गणरूपाय ते नमः ॥ ५४॥

नमो रश्मिस्वरूपाय रश्मिरूपाय ते नमः ।
नमो मलयरूपाय रश्मिरूपाय ते नमः ॥ ५५॥

नमो विभक्तिरूपाय विमलाय नमो नमः ।
नमो मधुररूपाय मधुपूर्णकलापिने ॥ ५६॥

कालेश्वराय कालाय कालनाथाय ते नमः ।
नमो विश्वप्रकाशाय भैरवाय नमो नमः ॥ ५७॥

नमो योनिस्वरूपाय मातृरूपाय ते नमः । var भ्रातृरूपाय
नमो भगिनीरूपाय भैरवाय नमो नमः ॥ ५८॥

नमो वृषस्वरूपाय कर्मरूपाय ते नमः ।
नमो वेदान्तवेद्याय वेदसिद्धान्तसारिणे ॥ ५९॥

नमः शाखाप्रकाशाय पुरुषाय नमो नमः ।
नमः प्रकृतिरूपाय भैरवाय नमो नमः ॥ ६०॥

नमो विश्वस्वरूपाय शिवरूपाय ते नमः ।
नमो ज्योतिःस्वरूपाय निर्गुणाय नमो नमः ॥ ६१॥

निरञ्जनाय शान्ताय निर्विकाराय ते नमः ।
निर्मयाय विमोहाय विश्वनाथाय ते नमः ॥ ६२॥

नमः कण्ठप्रकाशाय शत्रुनाशाय ते नमः ।
नमः आशाप्रकाशाय आशापूरकृते नमः ॥ ६३॥

नमो मत्स्यस्वरूपाय योगरूपाय ते नमः ।
नमो वाराहरूपाय वामनाय नमो नमः ॥ ६४॥

नमः आनन्दरूपाय आनन्दाय नमो नमः ।
नमोऽस्त्वनर्घकेशाय ज्वलत्केशाय ते नमः ॥ ६५॥

नमः पापविमोक्षाय मोक्षदाय नमो नमः ।
नमः कैलासनाथाय कालनाथाय ते नमः ॥ ६६॥

नमो बिन्दुदबिन्दाय बिन्दुभाय नमो नमः ।
नमः प्रणवरूपाय भैरवाय नमो नमः ॥ ६७॥

नमो मेरुनिवासाय भक्तवासाय ते नमः ।
नमो मेरुस्वरूपाय भैरवाय नमो नमः ॥ ६८॥

नमो भद्रस्वरूपाय भद्ररूपाय ते नमः ।
नमो योगिस्वरूपाय योगिनां पतये ते नमः ॥ ६९॥

नमो मैत्रस्वरूपाय मित्ररूपाय ते नमः । var मन्त्रस्वरूपाय
नमो ब्रह्मनिवासाय काशीनाथाय ते नमः ॥ ७०॥

नमो ब्रह्माण्डवासाय ब्रह्मवासाय ते नमः ।
नमो मातङ्गवासाय सूक्ष्मवासाय ते नमः ॥ ७१॥

नमो मातृनिवासाय भ्रातृवासाय ते नमः ।
नमो जगन्निवासया जलावासाय ते नमः ॥ ७२॥

नमः कौलनिवासाय नेत्रवासाय ते नमः ।
नमो भैरववासाय भैरवाय नमो नमः ॥ ७३॥

नमः समुद्रवासाय वह्निवासाय ते नमः ।
नमश्चन्द्रनिवासाय चन्द्रावासाय ते नमः ॥ ७४॥

नमः कलिङ्गवासाय कलिङ्गाय नमो नमः ।
नमः उत्कलवासाय शक्रवासाय ते नमः ॥ ७५॥ var इन्द्रवासाय ते नमः

नमः कर्पूरवासाय सिद्धिवासाय नमः ।
नमः सुन्दरवासाय भैरवाय नमो नमः ॥ ७६॥

नमः आकाशवासाय वासिने सर्वयोगिनाम् ।
नमो ब्राह्मणवासाय शूद्रवासाय ते नमः ॥ ७७॥

नमः क्षत्रियवासाय वैश्यवासाय ते नमः ।
नमः पक्षिनिवासाय भैरवाय नमो नमः ॥ ७८॥

नमः पातालमूलाय मूलावासाय ते नमः ।
नमो रसातलस्थाय सर्वपातालवासिने ॥ ७९॥ var रसातलवासाय
नमः कङ्कालवासाय कङ्कवासाय ते नमः ।
नमः मन्त्रनिवासाय भैरवाय नमो नमः ॥ ८०॥

नमोऽहङ्काररूपाय रजोरूपाय ते नमः ।
नमः सत्त्वनिवासाय भैरवाय नमो नमः ॥ ८१॥

नमो नलिनरूपाय नलिनाङ्गप्रकाशिने ।
नमः सूर्यस्वरूपाय भैरवाय नमो नमः ॥ ८२॥

नमो दुष्टनिवासाय साधूपायस्वरूपिणे ।
नमो नम्रस्वरूपाय स्तम्भनाय नमो नमः ॥ ८३॥

पञ्चयोनिप्रकाशाय चतुर्योनिप्रकाशिने ।
नवयोनिप्रकाशाय भैरवाय नमो नमः ॥ ८४॥

नमः षोडशरूपाय नमः षोडशधारिणे ।
चतुत्षष्टिप्रकाशाय भैरवाय नमो नमः ॥ ८५॥

नमो बिन्दुप्रकाशाय सुप्रकाशाय ते नमः । var सुखप्रकाशाय
नमो गणस्वरूपाय सुखरूप नमोऽस्तुते ॥ ८६॥

नमश्चाम्बररूपाय भैरवाय नमो नमः । var नमोऽम्बरस्वरूपाय
नमो नानास्वरूपाय सुखरूप नमोऽस्तुते ॥ ८७॥ var मुखरूप

नमो दुर्गस्वरूपाय दुःखहर्त्रे नमोऽस्तुते । var दुःखरन्त्रे
नमो विशुद्धदेहाय दिव्यदेहाय ते नमः ॥ ८८॥

नमो भैरवरूपाय भैरवाय नमो नमः ।

नमः प्रेतनिवासाय पिशाचाय नमो नमः ॥ ८९॥

नमो निशाप्रकाशाय निशारूप नमोऽस्तु ते ।
नमः सोमार्धरामाय धराधीशाय ते नमः ॥ ९०॥

नमः संसारभाराय भारकाय नमो नमः ।
नमो देहस्वरूपाय अदेहाय नमो नमः ॥ ९१॥

देवदेहाय देवाय भैरवाय नमो नमः ।
विश्वेश्वराय विश्वाय विश्वधारिन्नमोऽस्तु ते ॥ ९२॥

स्वप्रकाशप्रकाशाय भैरवाय नमो नमः ।
स्थितिरूपाय नित्याय स्थितीनां पतये नमः ॥ ९३॥

सुस्थिराय सुकेशाय केशवाय नमो नमः ।
स्थविष्ठाय गरिष्ठाय प्रेष्ठाय परमात्मने ॥ ९४॥

नमो भैरवरूपाय भैरवाय नमो नमः ।
नमः पारदरूपाय पवित्राय नमो नमः ॥ ९५॥

नमो वेधकरूपाय अनिन्दाय नमो नमः । var ह्यनिन्द्याय
नमः शब्दस्वरूपाय शब्दातीताय ते नमः ॥ ९६॥

नमो भैरवरूपाय भैरवाय नमो नमः ।
नमोऽनिन्द्यस्वरूपाय ह्यनिन्दाय नमः ॥ ९७॥

नमो विष्णुरूपाय भैरवाय नमो नमः । var विशदरूपाय
नमः शरणरूपाय शरण्यानां नमो ॥ ९८॥

नमः शरण्यरक्षाय भैरवाय सुखाय ते ।
नमः स्वाहास्वरूपाय स्वधारूपाय ते नमः ॥ ९९॥

नमो वौषड्वरूपाय भैरवाय नमो नमः ।
अक्षराय नमस्तुभ्यं त्रिधामात्रास्वरूपिणे ॥ १००॥

नमोऽक्षराय शुद्धाय भैरवाय नमो नमः ।
अर्धमात्राय पूर्णाय सम्पूर्णाय नमो नमः ॥ १०१॥

नमो भैरवरूपाय भैरवाय नमो नमः ।
नमोऽष्टचक्ररूपाय ब्रह्मरूपाय ते नमः ॥ १०२॥

नमो भैरवरूपाय भैरवाय नमो नमः ।
नमः सृष्टिस्वरूपाय सृष्टिकर्त्रे महात्मने ॥ १०३॥

नमः पाल्यस्वरूपाय भैरवाय नमो नमः ।
सनातनाय नित्याय निर्गुणाय गुणाय ते ॥ १०४॥

नमः सिद्धाय शान्ताय भैरवाय नमो नमः ।
नमो धारास्वरूपाय खड्गहस्ताय ते नमः ॥ १०५॥

नमस्त्रिशूलहस्ताय भैरवाय नमो नमः ।
नमः कुण्डलवर्णाय शवमुण्डविभूषिणे ॥ १०६॥

महाक्रुद्धाय चण्डाय भैरवाय नमो नमः ।
नमो वासुकिभूषाय सर्पभूषाय ते नमः ॥ १०७॥ var सर्वभूषाय

नमः कपालहस्ताय भैरवाय नमो नमः ।
पानपात्रमत्ताय मत्तरूपाय ते नमः ॥ १०८॥

नमो भैरवरूपाय भैरवाय नमो नमः ।
नमो माधवरूपाय माधवाय नमो नमः ॥ १०९॥ var माध्वाकारसुपर्णाय
नमो माङ्गल्यरूपाय भैरवाय नमो नमः ।
नमः कुमाररूपाय स्त्रीरूपाय नमो नमः ॥ ११०॥

नमो गन्धस्वरूपाय भैरवाय नमो नमः ।
नमो दुर्गन्धिरूपाय सुगन्धाय नमो नमः ॥ १११॥

नमः पुष्पस्वरूपाय पुष्पभूषण ते नमः ।
नमः पुष्पप्रकाशाय भैरवाय नमो नमः ॥ ११२॥

नमः पुष्पविनोदाय पुष्पपूजाय ते नमः ।
नमो भक्तिनिवासाय भक्तदुःखनिवारिणे ॥ ११३॥

भक्तप्रियाय शान्ताय भैरवाय नमो नमः ।
नमो भक्तिस्वरूपाय रूपदाय नमो नमः ॥ ११४॥

नमो भैरवरूपाय भैरवाय नमो नमः ।
नमो वासाय भद्राय वीरभद्राय ते नमः ॥ ११५॥

नमः सङ्ग्रामसाराय भैरवाय नमो नमः ।
नमः खट्वाङ्गहस्ताय कालहस्ताय ते नमः ॥ ११६॥

नमोऽघोराय घोराय घोराघोरस्वरूपिणे ।
घोरधर्माय घोराय भैरवाय नमो नमः ॥ ११७॥

घोरत्रिशूलहस्ताय घोरपानाय ते नमः ।
घोररूपाय नीलाय भैरवाय नमो नमः ॥ ११८॥

घोरवाहनगम्याय अगम्याय नमो नमः ।
घोरब्रह्मस्वरूपाय भैरवाय नमो नमः ॥ ११९॥

घोरशब्दाय घोराय घोरदेहाय ते नमः ।
घोरद्रव्याय घोराय भैरवाय नमो नमः ॥ १२०॥

घोरसङ्घाय सिंहाय सिद्धिसिंहाय नमो नमः ।
नमः प्रचण्डसिंहाय सिंहरूपाय ते नमः ॥ १२१॥

नमः सिंहप्रकाशाय सुप्रकाशाय ते नमः ।
नमो विजयरूपाय जगदाद्य नमो नमः ॥ १२२॥ var जयदाय
नमो भार्गवरूपाय गर्भरूपाय ते नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥ १२३॥

नमो मेध्याय शुद्धाय मायाधीशाय ते नमः ।
नमो मेघप्रकाशाय भैरवाय नमो नमः ॥ १२४॥

दुर्ज्ञेयाय दुरन्ताय दुर्लभाय दुरात्मने ।
भक्तिलभ्याय भव्याय भाविताय नमो नमः ॥ १२५॥ var भविताय

नमो गौरवरूपाय गौरवाय नमो नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥ १२६॥

नमो विघ्ननिवाराय विघ्ननाशिन्नमोऽस्तुते ।
विघ्नविद्रावणायैव भैरवाय नमो नमः ॥ १२७॥ var नमो विघ्नविदाराय

नमो किंशुकरूपाय रजोरूपाय ते नमः ।
नमो नीलस्वरूपाय भैरवाय नमो नमः ॥ १२८॥

नमो गणस्वरूपाय गणनाथाय ते नमः ।

नमो विश्वविकासाय भैरवाय नमो नमः ॥ १२९॥ var विश्वप्रकाशाय
नमो योगिप्रकाशाय योगिगम्याय ते नमः ।
नमो हेरम्बरूपाय भैरवाय नमो नमः ॥ १३०॥

नमस्त्रिधास्वरूपाय रूपदाय नमो नमः ।
नमः स्वरस्वरूपाय भैरवाय नमो नमः ॥ १३१॥

नमः सरस्वतीरूप बुद्धिरूपाय ते नमः ।
नमो वन्द्यस्वरूपाय भैरवाय नमो नमः ॥ १३२॥

नमस्त्रिविक्रमरूपाय त्रिस्वरूपाय ते नमः ।
नमः शशाङ्करूढाय भैरवाय नमो नमः ॥ १३३॥ var शशाङ्करूपाय

नमो व्यापकरूपाय व्याप्यरूपाय ते नमः ॥

नमो भैरवरूपाय भैरवाय नमो नमः ॥ १३४॥

नमो विशदरूपाय भैरवाय नमो नमः ।
नमः सत्यस्वरूपाय भैरवाय नमो नमः ॥ १३५॥ var सत्त्वस्वरूपाय
नमः सूक्तस्वरूपाय शिवदाय नमो नमः ।
नमो गङ्गास्वरूपाय यमुनारूपिणे नमः ॥ १३६॥

नमो गौरीस्वरूपाय भैरवाय नमो नमः ।
नमो दुःखविनाशाय दुःखमोक्षस्वरूपिणे ॥ १३७॥

महाचलाय वन्द्याय भैरवाय नमो नमः ।
नमो नन्दस्वरूपाय भैरवाय नमो नमः ॥ १३८॥

नमो नन्दिस्वरूपाय स्थिररूपाय ते नमः ।
नमो केलिस्वरूपाय भैरवाय नमो नमः ॥ १३९॥

नमः क्षेत्रनिवासाय वासिने ब्रह्मवादिने ।
नमः शान्ताय शुद्धाय भैरवाय नमो नमः ॥ १४०॥

नमो नर्मदरूपाय जलरूपाय ते नमः ।
नमो विश्वविनोदाय जयदाय नमो नमः ॥ १४१॥

नमो महेन्द्ररूपाय महनीयाय ते नमः ।
नमः संसृतिरूपाय शरण्याय च ते नमः ॥ १४२॥ var शरणीयाय

नमस्त्रिबन्धुवासाय बालकाय नमो नमः ।
नमः संसारसाराय सरसां पतये नमः ॥ १४३॥

नमस्तेजःस्वरूपाय भैरवाय नमो नमः । var नमस्ते जलरूपाय
नमः काव्यस्वरूपाय भैरवाय नमो नमः ॥ १४४॥ var कारुण्यरूपाय

नमो गोकर्णरूपाय ब्रह्मवर्णाय ते नम ।
नमः शङ्करवर्णाय हस्तिकर्णाय ते नमः ॥ १४५॥

नमः विष्टरकर्णाय यज्ञकर्णाय ते नमः ।
नमः शम्बुककर्णाय भैरवाय नमो नमः ॥ १४६॥

नमो दिव्यसुकर्णाय कालकर्णाय ते नमः ।
नमो भयदकर्णाय भैरवाय नमो नमः ॥ १४७॥

नमः आकाशवर्णाय कालकर्णाय ते नमः ।
नमो दिग्रूपकर्णाय भैरवाय नमो नमः ॥ १४८॥

नमो विशुद्धकर्णाय विमलाय नमो नमः ।
नमः सहस्रकर्णाय भैरवाय नमो नमः ॥ १४९॥

नमः नेत्रप्रकाशाय सुनेत्राय नमो नमः ।
नमो वरदनेत्राय जयनेत्राय ते नमः ॥ १५०॥

नमो विमलनेत्राय योगिनेत्राय ते नमः ।
नमः सहस्रनेत्राय भैरवाय नमो नमः ॥ १५१॥

नमः कलिन्दरूपाय कलिन्दाय नमो नमः ।
नमो ज्योतिःस्वरूपाय ज्योतिषाय नमो नमः ॥ १५२॥

नमस्तारप्रकाशायताररूपिन्नमोऽस्तु ते ।
नमो नक्षत्रनेत्राय भैरवाय नमो नमः ॥ १५३॥

नमश्चन्द्रप्रकाशाय चन्द्ररूप नमोऽस्तु ते ।
नमो रश्मिस्वरूपाय भैरवाय नमो नमः ॥ १५४॥

नमः आनन्दरूपाय जयानन्दस्वरूपिणे । var जगदानन्दरूपिणे
नमः द्रविडरूपाय भैरवाय नमो नमः ॥ १५५॥

नमः शङ्खनिवासाय शङ्कराय नमो नमः ।

नमो मुद्राप्रकाशाय भैरवाय नमो नमः ॥ १५६॥

नमो न्यासस्वरूपाय न्यासरूप नमोऽस्तुते ।
नमो बिन्दुस्वरूपाय भैरवाय नमो नमः ॥ १५७॥

नमो विसर्गरूपाय प्रणवरूपाय ते नमः ।
नमो मन्त्रप्रकाशाय भैरवाय नमो नमः ॥ १५८॥

नमो जम्बुकरूपाय जङ्गमाय नमो नमः ।
नमो गरूडरूपाय भैरवाय नमो नमः ॥ १५९॥

नमो लम्बुकरूपाय लम्बिकाय नमो नमः ।
नमो लक्ष्मीस्वरूपाय भैरवाय नमो नमः । ॥ १६०॥

नमो वीरस्वरूपाय वीरणाय नमो नमः ।
नमः प्रचण्डरूपाय भैरवाय नमो नमः ॥ १६१॥

नमो दम्भस्वरूपाय डमरूधारिन्नमोऽस्तु ते ।
नमः कलङ्कनाशाय कालनाथाय ते नमः ॥ १६२॥

नमः सिद्धिप्रकाशाय सिद्धिदाय नमो नमः । var ऋद्धिप्रकाशाय
नमः सिद्धस्वरूपाय भैरवाय नमो नमः ॥ १६३॥

नमो धर्मप्रकाशाय धर्मनाथाय ते नमः ।
धर्माय धर्मराजाय भैरवाय नमो नमः ॥ १६४॥

नमो धर्माधिपतये धर्मध्येयाय ते नमः ।
नमो धर्मार्थसिद्धाय भैरवाय नमो नमः ॥ १६५॥

नमो निर्जररूपाय रूपारूपप्रकाशिने । var विरजरूपाय
नमो राजप्रकाशाय भैरवाय नमो नमः ॥ १६६॥

नमः प्रतापसिंहाय प्रतापाय नमो नमः ।
नमः कोटिप्रतापाय भैरवाय नमो नमः ॥ १६७॥

नमः सहस्ररूपाय कोटिरूपाय ते नमः ।
नमः आनन्दरूपाय भैरवाय नमो नमः ॥ १६८॥

नमः संहारबन्धाय बन्धकाय नमो नमः ।
नमः विमोक्षरूपाय मोक्षदाय नमो नमः ॥ १६९॥

नमो विष्णुस्वरूपाय व्यापकाय नमो नमः ।
नमो माङ्गल्यनाथाय शिवनाथाय ते नमः ॥ १७०॥

नमो व्यालाय व्याघ्राय व्याघ्रस्तपिन्नमोऽस्तु ते । var व्याघ्ररूप नमोऽस्तु ते
नमो व्यालविभूषाय भैरवाय नमो नमः ॥ १७१॥

नमो विद्याप्रकाशाय विद्यानां पतये नमः ।
नमो योगिस्वरूपाय क्रूररूपाय ते नमः ॥ १७२॥

नमो संहाररूपाय शत्रुनाशाय ते नमः ।
नमो पालकरूपाय भैरवाय नमो नमः ॥ १७३॥

नमः कारुण्यदेवाय देवदेवाय ते नमः ।
नमो विश्वविलासाय भैरवाय नमो नमः ॥ १७४॥

नमो नमः प्रकाशाय काशीवासिन्नमोऽस्तु ते ।
नमो भैरवक्षेत्राय क्षेत्रपालाय ते नमः ॥ १७५॥

नमो भद्रस्वरूपाय भद्रकाय नमो नमः ।
नमो भद्राधिपतये भयहन्त्रे नमोऽस्तु ते ॥ १७६॥

नमो मायाविनोदाय मायिने मदरूपिणे ।
नमो मत्ताय शान्ताय भैरवाय नमो नमः ॥ १७७॥ var मलाय

नमो मलयवासाय कैलासाय नमो नमः ।
नमो कैलासवासाय कालिकातनयाय ते नमः ॥ १७८॥

नमो संसारपाराय भैरवाय नमो नमः । var संसारसाराय
नमो मातृविनोदाय विमलाय नमो नमः ॥ १७९॥

नमो यमप्रकाशाय नियमाय नमो नमः ।
नमः प्राणप्रकाशाय ध्यानाधिपतये नमः ॥ १८०॥

नमो समाधिरूपाय निर्गुणाय नमो नमः ।
नमः मन्त्रप्रकाशाय मन्त्ररूपाय नमः ॥ १८१॥

नमो वृन्दविनोदाय वृन्दकाय नमो नमः ।
नमः बृंहितरूपाय भैरवाय नमो नमः ॥ १८२॥

नमो मान्यस्वरूपाय मानदाय नमो नमः ।
नमो विश्वप्रकाशाय भैरवाय नमो नमः ॥ १८३॥

नमो नैमिषपीठाय सिद्धपीठाय ते नमः । var वै स्थिरपीठाय
नमो मण्डलपीठाय भक्तपीठाय ते नमः ॥ १८४॥ var उक्तपीठाय

नमो यशोदानाथाय कामनाथाय ते नमः ।
नमो विनोदनाथाय सिद्धनाथाय ते नमः ॥ १८५॥

नमो नाथाय नाथाय ज्ञाननाथाय ते नमः ।
नमः शङ्करनाथाय जयनाथाय ते नमः ॥ १८६॥

नमो मुद्गलनाथाय नीलनाथाय ते नमः ।
नमो बालकनाथाय धर्मनाथाय ते नमः ॥ १८७॥

विश्वनाथाय नाथाय कार्यनाथाय ते नमः ।
नमो भैरवनाथाय महानाथाय ते नमः ॥ १८८॥

नमो ब्रह्मसनाथाय योगनाथाय ते नमः ।
नमो विश्वविहाराय विश्वभाराय ते नमः ॥ १८९॥ var विश्वमाराय

नमो रङ्गसनाथाय रङ्गनाथाय ते नमः ।
नमो मोक्षसनाथाय भैरवाय नमो नमः ॥ १९०॥

नमो गोरखनाथाय गोरक्षाय नमो नमः ।
नमो मन्दारनाथाय नन्दनाथाय ते नमः ॥ १९१॥

नमो मङ्गलनाथाय चम्पानाथाय ते नमः ।
नमः सन्तोषनाथाय भैरवाय नमो नमः ॥ १९२॥

नमो निर्धननाथाय सुखनाथाय ते नमः । var नमोऽङ्गारकनाथाय
नमः कारुण्यनाथाय भैरवाय नमो नमः ॥ १९३॥

नमो द्रविडनाथाय दरीनाथाय ते नमः ।
नमः संसारनाथाय जगन्नाथाय ते नमः ॥ १९४॥

नमो माध्वीकनाथाय मन्त्रनाथाय ते नमः ।
नमो न्याससनाथाय ध्याननाथाय ते नमः ॥ १९५॥

नमो गोकर्णनाथाय महानाथाय ते नमः ।

नमः शुभ्रसनाथाय भैरवाय नमो नमः ॥ १९६॥

नमो विमलनाथाय मण्डनाथाय ते नमः । var मण्डलेशाय
नमः सरोजनाथाय मत्स्यनाथाय ते नमः ॥ १९७॥ var सत्यनाथाय ते

नमो भक्तसनाथाय भक्तिनाथाय ते नमः ।
नमो मोहननाथाय वत्सनाथाय ते नमः ॥ १९८॥

नमो मातृसनाथाय विश्वनाथाय ते नमः ।
नमो बिन्दुसनाथाय जयनाथाय ते नमः ॥ १९९॥

नमो मङ्गलनाथाय धर्मनाथाय ते नमः ।
नमो गङ्गासनाथाय भूमिनाथाय ते नमः ॥ २००॥

नमो धीरसनाथाय बिन्दुनाथाय ते नमः ।
नमः कञ्चुकिनाथाय श्रृङ्गिनाथाय ते नमः ॥ २०१॥

नमो समुद्रनाथाय गिरिनाथाय ते नमः ।
नमः माङ्गल्यनाथाय कद्रुनाथाय ते नमः ॥ २०२॥ var कुट्टनाथाय

नमो वेदान्तनाथाय श्रीनाथाय ते नमः ।
नमो ब्रह्माण्डनाथाय भैरवाय नमो नमः ॥ २०३॥

नमो गिरिशनाथाय वामनाथाय ते नमः ।
नमः बीजसनाथाय भैरवाय नमो नमः ॥ २०४॥

नमो मन्दिरनाथाय मन्दनाधाय ते नमः । var मन्दरनाथाय
नमो भैरवीनाथाय भैरवाय नमो नमः ॥ २०५॥

अम्बानाथाय नाथाय जन्तुनाथाय ते नमः ।
नमः कालिसनाथाय भैरवाय नमो नमः ॥ २०६॥

नमो मुकुन्दनाथाय कुन्दनाथाय ते नमः ।
नमः कुण्डलनाथाय भैरवाय नमो नमः ॥ २०७॥

नमोऽष्टचक्रनाथाय चक्रनाथाय ते नमः ।
नमो विभूतिनाथाय शूलनाथाय ते नमः ॥ २०८॥

नमो न्यायसनाथाय न्यायनाथाय ते नमः ।
नमो दयासनाथाय जङ्गमनाथाय ते नमः ॥ २०९॥ var जङ्गमेशाय

नमो विशदनाथाय जगन्नाथाय ते नमः ।
नमो कामिकनाथाय भैरवाय नमो नमः ॥ २१०॥

नमः क्षेत्रसनाथाय जीवनाथाय ते नमः ।
नमः शैलनाथाय चैलनाथाय ते नमः ॥ २११॥ var केवलनाथाय
नमो मात्रासनाथाय अमात्राय नमो नमः ।
नमो द्वन्द्वसनाथाय भैरवाय नमो नमः । नमः ॥ २१२॥

नमः शूरसनाथाय शूरनाथाय ते नमः ।
नमः सौजन्यनाथाय सौजन्याय नमो नमः ॥ २१३॥

नमो दुष्टसनाथाय भैरवाय नमो नमः ।
नमो भयसनाथाय बिम्बनाथाय ते नमः ॥ २१४॥

नमो भैरवनाथाय भैरवाय नमो नमः । var मायासनाथाय
नमो विटङ्कनाथाय टङ्कनाथाय ते नमः ॥ २१५॥

नमश्चर्मसनाथाय खड्गनाथाय ते नमः ।
नमः शक्तिसनाथाय धनुर्नाथाय ते नमः ॥ २१६॥

नमो बाणसनाथाय शापनथाय ते नमः । var मानसनाथाय
नमो यन्त्रसनाथाय भैरवाय नमो नमः ॥ २१७॥

नमो गण्डूषनाथाय गण्डूषाय नमो ।
नमो डाकिनीनाथाय भैरवाय नमो नमः ॥ २१८॥

नमो डामरनाथाय डारकाय नमो नमः ।
नमो डङ्कसनाथाय डङ्कनाथाय ते नमः ॥ २१९॥

नमो माण्डवनाथाय यज्ञनाथाय ते नमः । var माण्डव्यनाथाय
नमो यजुःसनाथाय क्रीडानाथाय ते नमः ॥ २२०॥

नमः सामसनाथायाथर्वनाथाय ते नमः ।
नमः शून्याय नाथाय स्वर्गनाथाय ते नमः ह्रीं ॐ ॥ २२१॥

फलश्रुतिः -
इदं नामसहस्रं मे रुद्रेण परिकीर्तितम् ।
यः पठेत्पाठयेद्वापि स एव मम सेवकः ॥ २२२॥

यं यं चिन्तयते कामं कारकारं प्रियाकृतिम् ।
यः श्रृणोति दुरापं स तं तं प्राप्नोति मामकः ॥ २२३॥

राजद्वारे श्मशाने तु पृथिव्यां जलसन्निधौ ।
यः पठेन्मानवो नित्यं स शूरः स्यान्न संशयः ॥ २२४॥

एककालं द्विकालं वा त्रिकालं वा पठेन्नरः ।
स भवेद्बुद्धिमाँल्लोके सत्यमेव न संशयः ॥ २२५॥

यः श्रृणोति नरो भक्त्या स एव गुणसागरः ।
यः श्रद्धया रात्रिकाले श्रृणोति पठतेऽपि वा ॥ २२६॥

स एव साधकः प्रोक्तः सर्वदुष्टविनाशकः ।
अर्धरात्रे पठेद्यस्तु स एव पुरुषोत्तमः ॥ २२७॥

त्रिसन्ध्ये वै देवगृहे श्मशाने च विशेषतः । var त्रिसन्ध्यायां
वने च मार्गगमने बले दुर्जनसन्निधौः ॥ २२८॥

यः पठेत्प्रयतो नित्यं स सुखी स्यान्न संशयः ।
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ॥ २२९॥

शौर्यार्थी लभते शौर्यं पुत्रार्थी पुत्रमाप्नुयात् ।
एकविंशतिमन्त्रेण अक्षरेण सहैव मे ॥ २३०॥

यः पठेत्प्रातरुत्थाय सर्वं काममवाप्नुयात् ।
रसार्थी आठमात्रेण रसं प्राप्नोति नित्यशः ॥ २३१॥

अन्नार्थी लभते चान्नं सुखार्थी सुखमाप्नुयात् ।
रोगी प्रमुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ॥ २३२॥

शापार्थी लभते शापं सर्वशत्रुविनाशनम् ।
स्थावरं जङ्गमं वापि विषं सर्वं प्रणश्यति ॥ २३३॥

सर्वलोकप्रियः शान्तो मातापितृप्रियङ्करः ।
सङ्ग्रामे विजयस्तस्य यः पठेद्भक्तिसंयुतः ॥ २३४॥

सर्वत्र जयदं देवि स्तोत्रमेतत्प्रकीर्तितम् ।
इदं स्तोत्रं महापुण्यं निन्दकाय न दर्शयेत् ॥ २३५॥ var महत्पुण्यं

असाधकाय दुष्टाय मातापितृविकारिणे ।

अधार्मिकाकुलीनाभ्यां नैतत्सोत्रं प्रकाशयेत् ॥ २३६॥

साधकाय च भक्ताय योगिने धार्मिकाय च ।
गुरुभक्ताय शान्ताय दर्शयेत्साधकोत्तमः ॥ २३७॥

अन्यथा पापलिप्तः स्यात्क्रोधाय भैरवोत्तमे । var स्यात्क्रोधन्नो
तस्मात्सर्वप्रयत्नेन गोपनीयं प्रयत्नतः ॥ २३८॥

इदं स्तोत्रं च रुद्रेण रामस्यापि मुखेऽर्पितम् ।
तन्मुखान्निःसृतं लोके दरिद्रायापि साधवे ॥ २३९॥

रामेण कथितं भ्रात्रे लक्ष्मणाय महात्मने ।
ततो दुर्वाससा प्राप्तं तनैवोक्तं तु पाण्डवे ॥ २४०॥

पाण्डवोऽप्यब्रवीत्कृष्णं कृष्णेनेह प्रकीर्तितम् ।
अस्य स्तोत्रस्य माहात्म्यं रामो जानाति तत्त्वतः ॥ २४१॥

रामोऽपि राज्यं सम्प्राप्तो ह्यस्य स्तोत्रस्य पाठतः ।
पाण्डवोऽपि तथा राज्यं सम्प्राप्तो भैरवस्य च ॥ २४२॥

अनेन स्तोत्रपाठेन किमलभ्यं भवेदिति ।
सर्वलोकस्य पूज्यस्तु जायते नात्र संशयः ॥ २४३॥

॥ इति श्रीरुद्रयामले श्रीबटुकभैरवसहस्रनामस्तोत्रं (२) सम्पूर्णम् ॥

baTuka and vaTuka are interchangeable.
Proofread by DPD, NA

.. Shri Batukabhairava SahasranAma Stotram 2 ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*